This electronic edition of the *Toṭakāṣṭaka* of Toṭakācārya, typed for the Gauḍīya Grantha Mandira (www.granthamandira.org) by Toke Lindegaard Knudsen, is based on the following printed source:

- *The Hymns of Śaṅkara*. T. M. P. Mahadevan. Delhi: Motilal Banarsidass Publishers Private Limited, 1980.

This is a hymn in eight verses in praise of Śaṅkarācārya by one of his chief disciples. The hymn is composed in the *toṭaka* metre and thus its author was given the name Toṭaka.

Copenhagen, Denmark
3 January 2004

# अथ तोटकाष्टकम्

विदिताखिलशास्त्रसुधाजलधे महितोपनिषत्कथितार्थनिधे ।
हृदये कलये विमलं चरणं भव शङ्कर देशिक मे शरणम् ॥१॥
करुणावरुणालय पालय मां भवसागरदुःखविदूनहृदम् ।
रचयाखिलदर्शनतत्त्वविदं भव शङ्कर देशिक मे शरणम् ॥२॥
भवता जनता सुहिता भविता निजबोधविचारण चारुमते ।
कलयेश्वरजीवविवेकविदं भव शङ्कर देशिक मे शरणम् ॥३॥
भव एव भवानिति मे नितरां समजायत चेतसि कौतुकिता ।
मम वारय मोहमहाजलधिं भव शङ्कर देशिक मे शरणम् ॥४॥
सुकृते ऽधिकृते बहुधा भवतो भविता समदर्शनलालसता ।
अतिदीनमिमं परिपालय मां भव शङ्कर देशिक मे शरणम् ॥५॥
जगतीमवितुं कलिताकृतयो विचरन्ति महामहसश्छलतः ।
अहिमांशुरिवात्र विभासि गुरो भव शङ्कर देशिक मे शरणम् ॥६॥
गुरुपुङ्गव पुङ्गवकेतन ते समतामयतां न हि को ऽपि सुधीः ।
शरणागतवत्सल तत्त्वनिधे भव शङ्कर देशिक मे शरणम् ॥७॥
विदिता न मया विशदैककला न च किञ्चन काञ्चनमस्ति गुरो ।
द्रुतमेव विधेहि कृपां सहजां भव शङ्कर देशिक मे शरणम् ॥८॥

॥ इति श्रीतोटकाचार्यविरचितं तोटकाष्टकं समाप्तम् ॥

॥ फिरङ्गिणा तोकाख्येन परोपकारार्थमिदं पुस्तकं लिखितम् ।श्रीरस्तु ॥